# શ્રીરામ આપદુધ્ધારકસ્તોત્રમ્

Shri Rama ApaduddhAraka stotram

sanskritdocuments.org

August 19, 2018

# Shri Rama ApaduddhAraka stotram

# શ્રીરામ આપદુદ્ધારકસ્તોત્રમ્

## Sanskrit Document Information

Text title : Shri Rama ApaduddhAraka stotram

File name : ApaduddhArakashrIrAma.itx

Category : stotra, raama

Location : doc_raama

Proofread by : KSR Ramachandran, PSA Easwaran psaeaswaran at gmail.com

Latest update : August 20, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 19, 2018

*sanskritdocuments.org*

# શ્રીરામ આપદુધ્દ્ધારકસ્તોત્રમ્

આપદામપહર્તારં દાતારં સર્વસમ્પદાં
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્ ।

નમઃ કોદણ્ડહસ્તાય સન્ધીકૃતશરાય ચ
દણ્ડિતાખિલદૈત્યાય રામાયાપન્નિવારિણે ॥ ૧॥

આપન્નજનરક્ષૈકદીક્ષાયામિતતેજસે ।
નમોઽસ્તુ વિષ્ણવે તુભ્યં રામાયાપન્નિવારિણે ॥ ૨॥

પદામ્ભોજરજસ્પર્શપવિત્રમુનિયોષિતે ।
નમોઽસ્તુ સીતાપતયે રામાયાપન્નિવારિણે ॥ ૩॥

દાનવેન્દ્રમહામત્તગજપઞ્ચાસ્યરૂપિણે ।
નમોઽસ્તુ રઘુનાથાય રામાયાપન્નિવારિણે ॥ ૪॥

મહિજાકુચસંલગ્નકુઙ્કુમારુણવક્ષસે ।
નમઃ કલ્યાણરૂપાય રામાયાપન્નિવારિણે ॥ ૫॥

પદ્મસમ્ભવભૂતેશમુનિસંસ્તુતકીર્તયે ।
નમો માર્તાણ્ડવંશ્યાય રામાયાપન્નિવારિણે ॥ ૬॥

હરત્યાર્તિં ચ લોકાનાં યો વા મધુનિષૂદનઃ ।
નમોઽસ્તુ હરયે તુભ્યં રામાયાપન્નિવારિણે ॥ ૭॥

તાપકારણસંસારગજસિંહસ્વરૂપિણે ।
નમો વેદાન્તવેદ્યાય રામાયાપન્નિવારિણે ॥ ૮॥

રઙ્ગત્તરઙ્ગજલધિગર્વહૃચ્છરધારિણે ।
નમઃ પ્રતાપરૂપાય રામાયાપન્નિવારિણે ॥ ૯॥

દારોપહિતચન્દ્રાવતંસધ્યાતસ્વમૂર્તયે ।
નમઃ સત્યસ્વરૂપાય રામાયાપન્નિવારિણે ॥ ૧૦॥

તારાનાયકસઙ્કાશવદનાય મહૌજસે ।
નમોઽસ્તુ તાટકાહન્ત્રે રામાયાપન્નિવારિણે ॥ ૧૧॥

રમ્યસાનુલસચ્ચિત્રકૂટાશ્રમવિહારિણે ।
નમસ્સૌમિત્રિસેવ્યાય રામાયાપન્નિવારિણે ॥ ૧૨॥

સર્વદેવાહિતાસક્ત દશાનનવિનાશિને ।
નમોઽસ્તુ દુઃખધ્વંસાય રામાયાપન્નિવારિણે ॥ ૧૩॥

રત્નસાનુનિવાસૈક વન્દ્યપાદામ્બુજાય ચ ।
નમસ્ત્રૈલોક્યનાથાય રામાયાપન્નિવારિણે ॥ ૧૪॥

સંસારબન્ધ મોક્ષૈકહેતુદામપ્રકાશિને ।
નમઃ કલુષસંહર્ત્રે રામાયાપન્નિવારિણે ॥ ૧૫॥

પવનાશુગસઙ્ક્ષિપ્તમારીચાદિસુરારયે ।
નમો મખપરિત્રાત્રે રામાયાપન્નિવારિણે ॥ ૧૬॥

દામ્ભિકેતરભક્તૌઘમહાનન્દપ્રદાયિને ।
નમઃ કમલનેત્રાય રામાયાપન્નિવારિણે ॥ ૧૭॥

લોકત્રયોદ્વેગકરકુમ્ભકર્ણશિરશ્છિદે ।
નમો નીરદદેહાય રામાયાપન્નિવારિણે ॥ ૧૮॥

કાકાસુરૈકનયનહરલ્લીલાસ્ત્રધારિણે ।
નમો ભક્તૈકવેદ્યાય રામાયાપન્નિવારિણે ॥ ૧૯॥

ભિક્ષુરૂપ સમાક્રાન્તબલિસર્વૈકસમ્પદે ।
નમો વામનરૂપાય રામાયાપન્નિવારિણે ॥ ૨૦॥

રાજીવનેત્રસુસ્પન્દરુચિરાઙ્ગસુરોચિષે ।
નમઃ કૈવલ્યનિધયે રામાયાપન્નિવારિણે ॥ ૨૧॥

મન્દમારુતસંવીતમન્દારદ્રુમવાસિને ।
નમઃ પલ્લવપાદાય રામાયાપન્નિવારિણે ॥ ૨૨॥

શ્રીકણ્ઠચાપદલનધુરીણબલબાહવે ।
નમઃ સીતાનુષક્તાય રામાયાપન્નિવારિણે ॥ ૨૩॥

રાજરાજસુહૃદ્યોષાર્ચિતમઙ્ગલમૂર્તયે ।
નમ ઇક્ષ્વાકુવંશ્યાય રામાયાપન્નિવારિણે ॥ ૨૪॥

મઞ્જુલાદર્શવિપ્રેક્ષણોત્સુકૈકવિલાસિને ।
નમઃ પાલિતભક્તાય રામાયાપન્નિવારિણે ॥ ૨૫॥

ભૂરિભૂધરકોદણ્ડમૂર્તિધ્યેયસ્વરૂપિણે ।
નમોઽસ્તુ તેજોનિધયે રામાયાપન્નિવારિણે ॥ ૨૬॥

યોગીન્દ્રહૃત્સરોજાતમધુપાય મહાત્મને ।
નમો રાજાધિરાજાય રામાયાપન્નિવારિણે ॥ ૨૭॥

ભૂવરાહસ્વરૂપાય નમો ભૂરિપ્રદાયિને ।
નમો હિરણ્યગર્ભાય રામાયાપન્નિવારિણે ॥ ૨૮॥

યોષાઞ્જલિવિનિર્મુક્ત લાજાઞ્ચિતવપુષ્મતે ।
નમસ્સૌન્દર્યનિધયે રામાયાપન્નિવારિણે ॥ ૨૯॥

નખકોટિવિનિર્ભિન્નદૈત્યાધિપતિવક્ષસે ।
નમો નૃસિંહરૂપાય રામાયાપન્નિવારિણે ॥ ૩૦॥

માયામાનુષદેહાય વેદોદ્ધરણહેતવે ।
નમોઽસ્તુ મત્સ્યરૂપાય રામાયાપન્નિવારિણે ॥ ૩૧॥

મિતિશૂન્ય મહાદિવ્યમહિમ્ને માનિતાત્મને ।
નમો બ્રહ્મસ્વરૂપાય રામાયાપન્નિવારિણે ॥ ૩૨॥

અહઙ્કારેતરજનસ્વાન્તસૌધવિહારિણે ।
નમોઽસ્તુ ચિત્સ્વરૂપાય રામાયાપન્નિવારિણે ॥ ૩૩॥

સીતાલક્ષ્મણસંશોભિપાર્શ્વાય પરમાત્મને ।
નમઃ પટ્ટાભિષિક્તાય રામાયાપન્નિવારિણે ॥ ૩૪॥

આપદામપહર્તારં દાતારં સર્વસમ્પદામ્ ।
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્ ॥ ૩૫॥

ફલશ્રુતિ

ઇમં સ્તવં ભગવતઃ પઠેદ્યઃ પ્રીતમાનસઃ ।
પ્રભાતે વા પ્રદોષે વા રામસ્ય પરમાત્મનઃ ॥ ૧॥

સ તુ તીર્ત્વા ભવામ્ભોધિમાપદસ્સકલા અપિ ।
રામસાયુજ્યમાપ્નોતિ દેવદેવપ્રસાદતઃ ॥ ૨॥

કારાગૃહાદિબાધાસુ સમ્પ્રાપ્તે બહુસઙ્કટે ।
અપન્નિવારકસ્તોત્રં પઠેદ્યસ્તુ યથાવિધિ ॥ ૩॥

સંયોજ્યાનુષ્ટુભં મન્ત્રમનુશ્લોકં સ્મરન્ વિભુમ્ ।
સપ્તાહાત્સર્વબાધાભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૪॥

દ્વાત્રિંશદ્વારજપતઃ પ્રત્યહં તુ દૃઢવ્રતઃ ।
વૈશાખે ભાનુમાલોક્ય પ્રત્યહં શતસઙ્ખ્યયા ॥ ૫॥

ધનવાન્ ધનદપ્રખ્યસ્સ ભવેન્નાત્ર સંશયઃ ।
બહુનાત્ર કિમુક્તેન યં યં કામયતે નરઃ ॥ ૬॥

તં તં કામમવાપ્નોતિ સ્તોત્રેણાનેન માનવઃ ।
યન્ત્રપૂજાવિધાનેન જપહોમાદિતર્પણૈઃ ॥ ૭॥

યસ્તુ કુર્વીત સહસા સર્વાન્ કામાનવાપ્નુયાત્ ।
ઇહ લોકે સુખી ભૂત્વા પરે મુક્તો ભવિષ્યતિ ॥ ૮॥

Proofread by KSR Ramachandran and
PSA Easwaran psaeaswaran at gmail.com

*Shri Rama ApaduddhAraka stotram*
pdf was typeset on August 19, 2018

Please send corrections to *sanskrit@cheerful.com*